वाणीं भजत

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ० प्र०) भारतम्

संपुटः ८ | 15 JANUARY 1970 | क्रमांकः १

शकवर्षः १८९१ [मूल्यम् ४० पैसाः

विषयसूची

——:o:——

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.

Samskrita Bhasha Pracharini Sabha, Chittoor.

विश्वावसूत्तरायणपरीक्षा फलितांशाः

Results Of March Examinations 1966

The following are the Registered Numbers of successful candidates who appeared for the Sanskrit Examinations held on 5th 6th and 7th March 1966 by the obove Sabha.

PARICHAYA

	First Class:—		472	473	491	492	495
498	499	500	515	517	518	519	524
525	543	545	549	551	560	562	565
577	602	606	608	611	616	642	643
644	645	646	647	649	676	678	687
688	689	690	692	693	694	696	700
708	716	717	718	722	724	737	738
752	756	762	766	788	795	796	797
798	799	800	801	802	806	830	825
826	832	833	834	836	837	840	851
899	900	901	902	903	905	918	929
933	934	985	936	940	949	950	957
958	963	965	968	969	972	973	974
976	977	978	979	980	988	997	998
1004	1028	1033	1034	1035	1039	1040	1041

1060 1061 1066 1067 1068 1070 1071 1073
1075 1076 1077 1091 1093 1094 1095 1096
1098 1099 1100 1101 1102 1104 1105 1109
1127 1128 1130 1153 1154 1155 1156 1163
1168 1173 1183 1186 1187 1197 1198 1200
1201 1205 1206 and 1208

Second Class:—474 478 493 494 501
502 514 516 520 523 528 544 546
548 553 557 558 559 561 564 566
568 569 570 573 597 598 599 600
607 609 613 614 639 640 641 651
656 657 659 663 665 672 673 679
680 685 686 691 695 698 701 702
704 707 720 725 726 735 742 743
751 753 754 755 757 758 759 760
761 763 764 765 767 768 769 770
772 779 782 785 787 805 821 822
830 839 843 844 846 850 860 895
904 916 921 922 925 928 930 932
937 938 939 941 943 944 945 946
948 951 952 953 954 959 960 961
962 964 966 975 982 986 993 994
995 996 999 1005 1006 1008 1027 1029
1030 1036 1037 1038 1051 1052 1053 1059
1063 1064 1072 1074 1078 1090 1092 1108
1103 1107 1108 1129 1139 1141 1146 1157
1164 1166 1167 1169 1170 1171 1172 1174
1175 1176 1177 1179 1180 1181 1184 1185
1189 1190 1191 1192 1193 1194 1195 1204
1210 1211 and 1212.

Third Class:— 471 475 521 522 527 554 556 563 574 575 576 579 594 595 601 608 610 612 615 619 620 648 661 662 667 669 699 733 734 741 771 773 774 775 776 777 780 781 789 803 804 818 819 831 833 841 842 845 852 853 855 859 863 897 917 919 920 924 927 931 942 955 956 1007 1026 1049 1050 1054 1058 1065 1097 1121 1122 1136 1137 1138 1140 1142 1143 1165 1178 1182 1188 1196 1202 1203 1209 and 1217.

ABHIGNA

First Class:— 480 483 484 505 506 507 508 509 531 532 533 538 541 588 630 638 721 807 808 809 881 884 906 907 908 970 971 1015 1042 1056 1057 1083 1085 1086 1123 1132 1158 1159 1160 and 1161.

Second Class:— 482 503 534 535 537 539 540 542 582 585 586 587 635 636 637 730 732 791 792 793 794 865 866 867 869 878 880 885 887 913 1009 1010 1011 1013 1014 1031 1043 1044 1045 1046 1080 1081 1087 1088 1110 1111 1112 1113 1114 1116 1145 1150 1199 1213 1214 and 1215.

Third Class— 586 580 581 583 584
604 622 625 627 631 632 633 634
731 823 824 866 870 871 878 883
909 910 911 912 914 915 1012 1032
1079 1082 1084 1089 1115 1147 1148 1149
1151 and 1216.

VICHAKSHANA

First Class— 723 Only
Second Class:— 485 529 530 571 714
810 811 812 813 1016 1017 1018 1019
1021 1022 1024 1025 1119 1133 and 1162

Third Class:— 518 572 590 591 708
709 710 711 712 713 729 745 876
1020 1028 1047 1048 1117 1118 and 1124

SAMARTHA

I Part Only 814 815 888 and 889
II Part Only:—877 Only

KOVIDA

II and IV Parts:—486 Only
I and III Parts 746 816 and 817
IV Part Only:— 748 749 and 750
I III and V Parts:— 890 Only

The following are the names of the candidates who stood first in first class of the above examinations.

Prizes will be awarded to them in due course.
PARICHAYA:-No. 1101. M. Ramkumar, Madurai
ABHIGNA:-No. 1132 T. Udayavarlu, Amalapuram
VICHAKSHANA—: No. 723 M. K. Jayaraman
Chidambaram

उत्तीर्णाः 622

परीक्षाः	अभ्यर्थिनः	उपस्थिताः	उत्तीर्णाः			
			प्र. श्रे.	द्वि. श्रे.	तृ. श्रे.	खण्डशः
परिचयः	529	463	161	184	88	—
अभिज्ञः	158	142	40	56	39	—
विचक्षणः	45	41	1	20	20	—
समर्थः	6	5	—	—	—	5
कोविदः	9	8	—	—	—	8
	747	659	202	260	147	13

उपयुक्तानि परीक्षाकेन्द्राणि 47.

(१) अच्चंपेट (२) अनन्तपुरम् (३) अम्बत्तूरु (४) आलुगड्डा (५) इन्द्रप्रस्थम् (६) कोत्तपेट (७) कोडवाशलू (८) कोमरगिरिपट्टनम् (९) कोयंबत्तूरु (ए) (१०) कोयंबत्तूरु (बि) (११) कोमपेट (१२) खम्मम् (१३) गुण्टूरु (१४) चित्तुरु (१५) चिदम्बरम् (१६) जग्गय्यपेट (१७) तंजावूरु (१८) ताम्बरम् (१९) तिम्मापुरम् (यं) (२०) तिरुवल्लिक्केणि (२१) तिरुमलै (२२) तिरुनगर (२३) तिरुचिरापल्ली (२४) पश्चिममांबलम् (२५) तिरुवल्लूरु (२६) तिरुवेंगाडु (२७) तेरिलंदूरु (२८) द्वारकतिरुमल (२९) नेल्लूरु (३०) पाकाल (३१) पामिडि (३२) प्रशांतिनेलयम् (३३) प्रोद्दूरु (३४) भीमवरम् (३५) मचलीपट्टणम् (३६) मदुरै (ए) (३७) मदुरै (बि) (३८) मन्त्रालय (३९) राजमहेंद्रवरम् (ए) (४०) मन्नार्गुडि (४१) बरोडा (४२) विजयवाडा (४३) शाहपूर् (४४) सेलम् (४५) हिन्दूपूर (४६) हीरमण्डलम् (४७) हैदराबाद ।

एताः उत्तरायणपरीक्षाः आन्ध्रद्राविडकर्णाटकगूर्जरमध्योत्तरप्रदेशेषु निर्विघ्नं निर्व्यूढा इति आनन्दमन्थराः स्मः ।

के० श्रीनिवासाचार्यः,
परीक्षामन्त्री.

—○—

राजाजीकथा २५

सदोषमपि न त्यजेत्

★

आ० वरदराजन्

गोदावरीतीरे चन्द्रपुरीं राजधानीं विधाय शूरसेनो राज्यमकरोत् । सोऽतीव विनीतः प्रजानुरञ्जकश्च । तस्य अनुशासनसमये बहवस्तपस्विनः आश्रम - पदेषु निरातङ्कं तपस्यन्त आसन् । तेषां कामितानि यथाकालं सिद्धिं गतानि ।

★ ★ ★

तेषां ऋषीणां मध्ये कश्चित् स्वभावत एव दोषदर्शी सदा सर्वदा परेषां दोषाविष्करणं कुर्वन्नासीत् । राजानमुपेत्य प्राह च-स्वामिन् ! तत्र भवता नारायण-महारण्ये तपश्चरितुं युक्तं - इत्यभ्यर्थितवांश्च । तत् सुदूरे विद्यमानं महदरण्यम् ।

प्रार्थितेन तेन ऋषिणा तथैव कृतम् । तत् निर्जनं वनम् । अतः तस्य अवधानं जनानामुपरि नोपासरत् । परन्तु तत्रत्यानां मृगाणां उपरि तस्य महर्षेः दृष्टिः प्रसृता । तत्र मृगाणां स्वभावोऽपि न तस्य महर्षेः मनोऽनुकूलं आसीत् । एकैकोऽपि मृगः अन्यं मृगं जिघांसति ।

किमिदं, किमर्थं वा दोषभूयिष्ठं इदं जीवितम् ! कथञ्चिदिदं निवारणीयम् । इति निश्चित्य तपस्तप्तुं स आरेभे ।

महादेव! एते मृगाः अन्योन्यं घातयन्तः प्रमत्ताः हिंसारता भवन्ति । भवानपि सर्वमेतदवलोकयन् तूष्णींभावं आतिष्ठते । किमेतन्निरोद्धुं नाऽलं भवति इति प्रार्थयमान एव तपस्तेपे । कठिनातिकठिनैः सुदारुणैः व्रतनियमैः सुघोरं तपस्तप्तुम् स आरेभे ।

यदि न सर्वत्र, अस्यां वाऽटव्यां यत्राहं वसामि - सर्वे प्राणिनः जीवकारुण्येन प्रवर्तमानाः जीवन्तु - तेषां ईदृशी सद्बुद्धिः दीयतामिति प्रार्थयामास ।

महादेवः सुप्रीतः सुप्रसन्नश्च भूत्वा "तथास्तु" इति वरमन्वग्रहीत ।

★ ★ ★

तदनु तस्मिन् नारायणवने व्याघ्रा तृणभक्षणे प्रवृत्ताः । वृकाः सृगालाः इत्यादयो घातुकमृगास्सर्वेऽपि फलाहारे प्रवृत्ताः । अतः हरिणा गवया इत्यादयस्सर्वे साधुजन्तवः सानन्दं वर्धमानाः प्रवर्तमानाश्चासन् । पक्षिणोऽपि क्रिमिकीटकादीन् अन्वेष्टुं न प्रवर्तन्ते । सर्वे मृगपक्षिणः जीवकारुण्येन मार्गेण प्रवर्तितुं आरभन्त ।

हरिणाः सूकराः इत्यादयः प्रचुरमात्रायां प्रवर्धमानाः अटवीं पूरयामासुः । ततोऽपि निर्गतास्ते निकटवर्तिनो ग्रामान् प्रविश्य सस्यक्षेत्राणि नाशयितुं उपक्रान्ताः, गृहेषु आपणेषु च सज्जीकृतानि वस्तूनि भक्षयितुं प्रवृत्ताः । वानराणां संख्या इयदमिताऽसीत, लक्षोपलक्षं ते यावद्देशं व्याप्ताः । यत्र क्वापि दृष्टिः सार्यतां सर्वत्र कुक्कुराः जम्बुका इत्यादय एव साक्षाद्भवन्ति स्म ।

नारायणवनप्रान्तीयां ग्रामा विजना विध्वंसं गताः । बहवो जना देशान्तरं गता ग्रामाद्ग्रामं अटन्तो महान्तं क्लेशमन्वभूवन् । इयं महाजन-क्लेशवार्ता चन्द्रपुरीमहाराजाय निवेदिता । महाराजसन्दर्शनार्थं निजदुःखनिवेदनार्थं च जनसन्दोह स्समागतः ।

★ ★ ★

राजा सर्वं वृत्तान्तं विचारयामास । अस्या दुरवस्थाया मूलं जीवदयालुमहर्षेः सत्संकल्प एव कारणमित्यज्ञासीत् । स सत्वरं सपरिवारस्तं महर्षिं द्रष्टुकामः प्रस्थितः ।

★ ★ ★

"स्वामिन्! कृपया भवान् अस्मद्राजधानीं चन्द्रपुरीं प्रविशतु। सर्वज्ञस्य सृष्टिनियमान् न परिवर्तयितुं न वा संस्कर्तुं वयं प्रभवाम;इति सविनयं व्यजिज्ञपत्

सोऽपि महर्षिः "तत्तथे" ति मौनेनैवांगीकृत्य निरहंममस्सन् नगरमागतः। महर्षेः तस्यैव आध्यक्ष्येण राजा महत्सदस्समायोजितवान् दैवप्रार्थनार्थम्।

व्याघ्राः सृगाला इत्यादयो हिंस्रा जन्तवो यथापूर्वं स्वस्वप्रकृतिसिद्धमेव आहारविधिमनुसरन्तु - इति सर्वैः प्रार्थितम्।

महादेवोऽपि सभाप्रार्थितम् पूरितमकरोत्। आज्ञापयामास च वन्यमृगान् "यूयं पूर्ववदेव स्वस्वप्रकृतिमाश्रित्य स्वेनैव सहजकर्मणा क्षुत्पिपासानिवृत्त्यै प्रवर्तध्व" मिति।

तत आरभ्य तस्मिन्नरण्ये मृगा नियमबद्धं जीवितं यापयन्ति स्म। निकटस्था ग्रामवासिनोऽपि पुनर्यथा पूर्वं स्वे स्वे ग्रामे निर्भयं निरुपद्रवं च न्यवसन्।

जीवदयालुमहर्षिरपि केवलदोषदर्शितां तत्याज।

> निर्दोषं सगुणं वस्तु, सदोषं निर्गुणं तथा।
> नैव नैवाऽत्र लभ्येत, सर्वं हि गुणदोषभाक्॥
>
> दोषे न दृष्टिरचिता न शांतिस्तस्य नो सुखम्।
> गुणेष्वादरबुद्ध्या तु "सदोषमपि न त्यजेत्"॥

* * *

—:o:—

* * *

दुष्टानां संसर्गः परिहरणीयः

साहित्यभूषणम् पडाल ब्रह्मारेड्डिः

कस्मिंश्चित् क्षेत्रे बहवः पक्षिणो बीजानि अंकुरान् च खादन्ति स्म। तत्क्षेत्रपतिर्वारंवारं क्षेत्रे बीजानि वपति स्म। परं पक्षिणो भूयोभूयः उप्तानि बीजानि भक्षयन्ति स्म। पक्षिणामेतेषां समूहं दृष्ट्वा कश्चित् सारसपक्षी अपि एतैस्साकं सम्मिल्य क्षेत्रे पतित्वा कीटकान् खादितुमारभत। यद्यपि आत्मनः क्षेत्रस्य दुरवस्था-मेतामवलोक्य क्षेत्रपतिनाऽनेके उपाया आलोचिताः, तथापि ते सर्वे नोपयुक्ता अभवन्।

अन्ततः क्षेत्रपतिरेकं बृहत्पाशं क्रीतवान्। स बृहत्पाशः क्षेत्रे सर्वत्र विस्तीर्णः। लोभिनः पक्षिणः पूर्वमिव यदा क्षेत्रे अपतन्, तदा पाशग्रस्ता अभवन्। सारसोऽपि पाशेन बद्धोऽभवत्। उपायान्तरभावाद् मधुरवचोभिरेव क्षेत्रपतये विश्वासमुत्पाद्य पाशादात्मनो मोचयितुं सर्वे पक्षिणः आलोचयामासुः।

क्षेत्रपतिः पाशग्रस्तान् पक्षिणो दृष्ट्वा नितरां सन्तुष्टोऽवदत् – "दुष्टा यूयं सर्वे अद्य हनिष्यध्वे, यतः इतःपरं कदापि मम युष्मद्भयो भयमीषदपि न भवेत्। उप्तानि बीजानि सर्वाणि यथावत् तिष्ठेयुः। तेऽभ्योंकुरा उत्पद्य धान्यानि प्रभूततया फलिष्यन्ति।" तदा तस्य वचांसि श्रुत्वा सारसातिरिक्ता अन्ये सर्वे पक्षिणः त्रस्ताः सविनयं क्षेत्रपतिमब्रुवन् – "वयं अज्ञानवशीभूता इत्थमकुर्महि। इतःपरं नैकदापि दयावतो भवतः क्षेत्रं खादयिष्यामः। किञ्चान्यान् पक्षिणोऽपि भवतः क्षेत्रखादनाद् वारयिष्यामः। कृपया पाशादस्मादस्मान् मोचयतु भवान्" इति। युष्माकं वचांसि विश्वस्य मोचयितुं नाहं मूर्ख इति प्रत्यवदत् क्षेत्रपतिः।

सारसोऽकथयत् – "अहन्तु सारसः, यः खलु सदा कृषीवलानां हितं करोति। अहमंकुरान् नाशयतः कीटकान् भक्षयित्वा भवतां साहाय्यमेव कुर्यामिति भावनया आगत्य क्षेत्रे कीटकान् भक्षयन् पाशेन बद्धः। अतः कृपया पाशाद् मां मोचयितुमर्हन्ति सर्वज्ञा भवन्तः।"

सारसस्य तस्य वचांस्याकर्ण्य क्षेत्रपतिर्विहस्याब्रवीत् – "क्षेत्रस्य क्षति-कारकैर्दुष्टैर्विहङ्गैस्साकं विचरन्नपि त्वमस्मद्धितकारी कथमसि! दुष्टानामेतेषां सङ्गत्यतः तव साधुरपि स्वभावः परिवर्तितः, यतः त्वं बीजभक्षणे चपलजिह्वोऽभवः। अतोऽहं शतवारमुक्तेऽपि परिवर्तितप्रकृतिं त्वां न मोचयिष्यामि। सा वस्तु सदा साधुभिस्साकमेव वर्तेरन्, परं न दुष्टानां समाजे।"

अथ तैः पक्षिभिस्साकं क्षेत्राधिपस्य गृहं नीयमानः सारसः आत्मनः मनसि दुःखेनाचिन्तयत् – "दुष्टानां संसर्गेण साधुस्वभावं मामपि अद्य हन्तुं नयति। अतः केनापि सज्जनेन लाभे लोभे वा प्राप्तेऽपि न स्थातव्यम् दुष्टैः साकम्। पुण्यात्मा दुर्जनानां निकटे वर्तेत यदि तदा दुःखभागी भवेदिति मे मतिः।"

मुक्तकम्

सङ्कलयिता :– मा. शिवरामराजः

★

"वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्तापि नो।
यत्नात्संचिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां सुतवधूं श्वश्रूश्चिरं रोदिति॥"

★

उन्नतविद्याभ्यासभाषा

कालूरि हनुमन्तरावः, बरोडा.

अस्मद्देशे सर्वेषु विश्वविद्यालयेषु उन्नतविद्याभ्यासः अधुना आंग्लभाषायां प्रचलति। परभाषेति, तदध्ययने क्लेशः अस्तीति च कृत्वा मातृभाषायां विद्याभ्यासो भवतु इति इदानीं विश्वविद्यालयाधिकारिण निश्चिन्वन्ति। यद्येवमभविष्यत् देशे विविधविश्वविद्यालयेषु तत्तत्प्रांतीयभाषासु उन्नतविद्याभ्यासः प्राचलिष्यन् देशसमैक्यतायाः भङ्गः उदभविष्यत्। शास्त्रपरिशोधनालयेषु (Research Institutes) तथा कर्मागारेषु (Factories) तत्तत्प्रांतशास्त्रज्ञैरेव कर्म कर्तुं शक्यते न तदन्यैः। ततः कर्मागारस्थापनादिषु विविधराष्ट्राणां इदानीमेव यावती स्पर्धा वर्तते सा विवर्ध्य कथं परिणमेत् तदद्य वक्तुं न पार्यते। भाषाराष्ट्ररूपेण देशे यद्विभागः अद्यास्ति स कालक्रमेण दृढीभूय सांस्कृतिकराजकीयविभाग एव किं न भविष्यति ?

तस्मात् देशे एकभाषायामेव उन्नत विद्याभ्यासो वांछनीयः। अलं मातृभाषादुरभिमानेन देशविच्छित्तिकारिणा। आंग्लभाषास्थानमाक्रमितुं देशभाषासु संस्कृतभाषैव समर्था। संस्कृतभाषाध्ययने सर्वप्रांतजनानां समानसौलभ्यक्लेशौ वर्तेते। प्रांतीयभाषाणां द्वारा संस्कृतभाषापदानि सर्वेषां परिचितान्येव। ततः संस्कृतभाषाप्रचारं कृत्वा, आंग्लभाषास्थाने संस्कृतं स्थापयित्वा उन्नतविद्याबोधनं संस्कृतभाषायां कुर्वंतु विश्वविद्यालयाधिकारिण इति आशास्महे।

को वा महान् ?

रचयिता – माचिराजु० शिवरामराजः

एकदा नारदो देवर्षिः भगवन्तं विष्णुमपृच्छत् —
"भगवन् ! अस्मिन् सर्वस्मिन् प्रपंचे कोऽवाधिकः महान् ? "
इति । तदा भक्तवत्सलो मन्दहासं कुर्वन्नाह - "वत्स ! त्रिलोक-
सञ्चारिणः तवाप्यज्ञातो विषयः अस्ति? शृणु, सर्वस्मिन् प्रपंचे भूः
महती । तां भुवं सागरः एकदेशे बिभर्ति । अतः सः महान् ।
तं सागरं महर्षिरगस्त्यः चलुकतां चकार । अतः महानगस्त्यः
सागरादपि । सोऽप्यगस्त्यः वियति एकत्र नक्षत्ररूपेण चकास्ति ।
अतः महान् आकाशः । तत् गगनं वामनावतारे अहं पादेन
आक्रमितवान् । अतोऽहं अधिकः । तादृशं मां त्वं हृदये
एकदेशे धारयसि । त्वन्मानसेऽहं हंसायमानो वर्ते । अतः सर्वेभ्यः
त्वमेव महान् अधिकश्च " इति ।

केचनैव महानुभावाः स्वच्छन्दं स्वच्छन्दं प्रेषितवन्तः। तेषां शुभनामानि दीयन्ते। अन्यानपि प्रार्थये स्वकं अवलम्बमपि प्रदातुम्। ति. कं. ति.

Namss of Subscribers of Gairvani 1966.

56.	T. S. Sundaram, Madras-44	4	75
57.	R. V. Krishnamurthy, M. Timmapuram	4	30
58.	K. Muthuswami, B. A., Madurai	4	00
59.	A. Ramakrishna Sastry, Madurai	4	25
60.	M. R. Kuppuswami Deekshitar, Salem	3	05
61.	P. Lakshmikanth, Rayadurg	4	00
63.	L. Krishnamurthy Achari, Salem	4	00
63,	K. Venkatachayulu, Cherukuvada	4	00
64.	Paranandanath A. V. Somachari, Parvathipuram	4	00
65.	K. H. Rao, Baroda	4	00

R. N. 8145/60. Postal R. No. H. 493.

वार्षिकम् रु. ४-००

प्रहेलिकाः

(श्री गोल्लापिन्नि वासुदेवशास्त्रिसंकलिताः)

मन्दारकुसुमाक्रान्तभृङ्गमालाविराजितम् ।
एकेन रामबाणेन रावणस्य रणे शिरः ॥

(अत्र आलवि (= छिन्न) इति क्रियापदं गुप्तम्)

कुमारसंभवं श्रुत्वा रघुवंशे मनोरमे ।
राक्षसानां कुलश्रेष्ठो रामो रक्तान्तलोचनः ।

(कुलश्रेष्ठः रक्तान्तलोचनः रामः राक्षसानां संभवं (उत्पत्तिं) श्रुत्वा मनोरमे रघुवंशे कु (भुवं) आर (विवेश) इत्यन्वयः)

मदमत्तमयूरस्य पृष्ठे माल्यवतो गिरेः ।
सीताविरहसंतप्तं रामं भृशमताडयत् ॥

(अत्र कः (= मन्मथः) इति कर्तृपदं गुप्तम् । मयूरस्य गिरा इत्यन्वयः)

Published by Sri N. Ramanatha Iyer B. A., B., L. Advocate & Secretary, S. B. P. Sbha, Chittoor. (A. P.) India
Printed by Sri T. K. Thiruvengadacharya, at Vijaya Press, Chittoor (A. P.) C. 1500